CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.DP.13.
Coll. No. 618

Title A work on Grammar

CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No.: 618 Subject: Grammer.

Title: A work on Grammar.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10.5" by 4.8" Extent: 56 to 86

Language: Sanskrit Script: Devanāgarī

Remarks: Begins and Ends abruptly.

हरणं।तदपिसंग्रहीतंभवति।किंपुनस्तत्।पठ्यामहेति।बृहत्संग्रहीतं।ननुचईकारयणामव्यवहि
तत्वात्।नासौनिमित्तात्पूर्वोभवति।व्यवहितेपिपूर्वशिष्टोवर्त्तते।तद्यथा।सर्वंमथुरायाःपाटलिपुत्रमि
ति।अथवापुनरस्तुआदिशएवा।निसंबध्यते।कथंयानिस्वविधौस्थानिवद्भावस्यप्रयोजनानि।नैता
निसंति।इष्टतावत्आयन्आसन्।धिन्वंतीत्।एवंतीति।अयंविधिशब्दोस्त्येवकर्मसाधनः।विधी
यतेविधिरिति।अस्तिभावसाधनः।विधानंविधिरिति।तत्रकर्मसाधनस्यविधिशब्दस्योपादाने
नसर्वमिष्टंसंगृहीतमितिकृत्वाभावसाधनस्यविधिशब्दस्योपादानंविज्ञास्यते।पूर्वस्यविधानंप्रति
पूर्वस्यभावंप्रतिपूर्वःस्यादितिस्थानिवद्भवतीति।एवमाद्धमविष्यति।दुध्मनत्रविष्यति।दध्यत्र
मध्वत्रचक्रतुःचक्रुरितिपरिहारंवक्ष्यति।कानिपुनरस्ययोगस्यप्रयोजनानि।स्तोष्याम्यहंपादिक
मोदवाहिंततःश्वोभूतेशातनीपातनींचानेतारावागच्छतंधारिणिंरावणिंचततःपश्चात्संस्यतेति।

ध्वंस्यते चाऽऽह इत्यत्र वसादिकं छेद वाहिंस्रा तत्रोपातनो धारणीरा वर्णेमेति अकारलोपे कृते पञ्चावऊठ्म
स्रोपष्टिलोपइत्यनेनविधेयः प्राप्नुवंति स्थानिवद्भावान्न भवंति ध्वंस्यते ध्वंस्यते णिलोपे कृते ऽनिदि
तो हल उपधायाः क्ङितीति नलोपः प्राप्नोति स्थानिवद्भावान्न भवति नेतानि संति प्रयोजनानि
असिद्धवदत्राभादित्यनेनाप्येतानि सिद्धानि इदं तर्हि प्रयोजनं याज्यते याप्यते णिलोपे कृते यजा
दीनां किति इति संप्रसारणं प्राप्नोति स्थानिवद्भावान्न भवति एतदपि नास्ति प्रयोजनं यजादि
दीनां किति इति संप्रसारणं प्राप्नोति स्थानिवद्भावान्न भवति एतदपि नास्ति प्रयोजनं यजादीनां
अकितविशेषणमेष्याम यजादीनां यः किदिति कश्च यजादीनां कित् यजादिभ्यो यो विहित इति
न चायं यजादिभ्यो विहितः इदं तर्हि प्रयोजनं यथा मद्य इति परस्य यणादेशे कृते पूर्वस्य न प्राप्नो
ति ईकार यणा व्यवहितत्वात् स्थानिवद्भावाद्भवति किं पुनः कारणं परस्य तावद्भवति न पुनः
पूर्वस्य नित्यत्वात् नित्यः परयणादेशः कृतेऽपि पूर्वयणादेशे प्राप्नोति अकृतेऽपि प्राप्नोति नित्यत्वा

५१

त्परयणादेशे कृते पूर्वस्य न प्राप्नोति स्थानिवद्भावाद्भवति एतदपि नास्ति प्रयोजनं असिद्धं बहिरंग
मंतरंगलक्षण इति असिद्धत्वाद्बहिरंगलक्षणस्य परयणादेशस्यान्तरंगलक्षणः पूर्वयणादेशो भवि
ष्यति अवश्यं चैषा परिभाषाश्रयितव्या स्वरार्था कश्रहि श्रेति उदात्तयणो हल्पूर्वादित्येष स्वरो य
थास्यात् अनेनापि सिद्धः स्वरः कथं आरभ्यमाणेऽपि नित्यो ऽसौ आरभ्यमाणे चास्मिन्योगे नित्यः पूर्व
यणादेशः कृतेऽपि परयणादेशे प्राप्नोति अकृतेऽपि परयणादेशोऽपि नित्यः कृतेऽपि पूर्वयणादेशे प्रा
प्नोति अकृतेऽपि परश्चासौ व्यवस्थया व्यवस्थया चासौ परः युगपत्संभवो नास्ति न चास्ति योगप
द्येन संभवः बहिरंगेणासिद्ध्यति असिद्धं बहिरंगलक्षणमंतरंगलक्षण इत्यनेन न सिद्ध्यति एवं तर्हि
यात्रोदात्तयणन्तरस्य यः स्वरो न विष्यति इकारयणा व्यवहितत्वान्न प्राप्नोति स्वरविधौ व्यंजनमवि
द्यमानवद्भवतीति नास्ति व्यवधानं सा तर्हि एषा परिभाषा कर्तव्या ननु चेयमपि कर्तव्या असिद्धं बहि

रंगलक्षणमंतरंगलक्षण इति। बहुप्रयोजनैषा परिभाषा। अवश्यमेषा कर्त्तव्या। सा चाप्यत्रालोकतः
सिद्धा। कथं। प्रत्यंगवृत्तिर्लोको लक्ष्यते। तद्यथा पुरुषोयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि ता
नि तावत्करोति। ततः सुहृदां ततः संबन्धिनां। प्रातिपदिकं चाप्युपदिष्टं सामान्यभूतेर्थे वर्त्तते। सामा
न्ये वर्त्तमानस्य व्यक्तिरुपजायते। व्यक्तस्य सतो लिंगसंख्याभ्यामन्वितस्य बाह्येनार्थेन योगो भव
ति। यथैव चास्यान्वर्थानां प्रादुर्भावः तथैव कार्याणामपि। बहुलकार्यैरपि भवितव्यम्। इमानि तर्हि प्र
योजनानि। पटयति। अवधीत्। बहुखट्वकः। पटयति लघयतीति टिलोपे कृते नत उपधायाः इति वृ
द्धिः प्राप्नोति। स्थानिवद्भावान्न भवति। अवधीति अकारलोपे कृतेऽतो हलादेर्लघोः इति विभाषा वृद्धिः
प्राप्नोति स्थानिवद्भावान्न भवति। बहुखट्वक इति आपोन्यतरस्यामिति ह्रस्वत्वे कृते ह्रस्वान्तेऽन्त्यात्पू
र्वमिति एष स्वरः प्राप्नोति स्थानिवद्भावान्न भवति। इह वैयाकरणः सौवश्व इति चाः स्थानिवद्भावाद्

दि३

यावोः प्राप्नुतः। तयोः प्रतिषेधो वक्तव्यः। अचः पूर्वविज्ञानादीधीवेव्योः सिद्धं। योनादिष्टादचः पूर्वः तस्य विधिं प्रति
स्थानिवद्भावः। आदिष्टाच्चैषोचः पूर्वः। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। अच इति पंचमी।
अचः पूर्वस्य। यद्येवमादेशः अविशेषितो भवति। आदेशश्चाविशेषितः। कथं। नह्यसौ षष्ठीनिर्दिष्टम
ग्रहणं। एतत्पंचमीनिर्दिष्टं कर्त्तव्यमिति किं तर्हि अन्यत्कर्त्तव्यम्। अन्यच्च न कर्त्तव्यम्। यदेवादः ष
ष्ठीनिर्दिष्टम् अज्ग्रहणं तस्य दिक्शब्दैर्योगे पंचमी भवति। अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रति नि५
स्थानिवद्भवति। कुतः पूर्वस्य। अच इति। तद्यथा आदेशः प्रथमानिर्दिष्टः तस्य दिक्शब्दैर्योगे पंचमी
भविष्यति आदेशादिति। तत्रादेशलक्षणप्रतिषेधः। तत्रादेशलक्षणं कार्यं प्राप्नोति। तस्य प्रतिषेधो
वक्तव्यः। याच्योः अधीयः। लोपो व्योर्वलीति यलोपः प्राप्नोति। असिद्धवचनात्सिद्धं। अजादेशः पर
निमित्तकः पूर्वस्य विधिं प्रति असिद्धो भवतीति वक्तव्यम्। असिद्धवचनात्सिद्धमिति चेदुत्सर्ग

हणानामनुदेशः। असिद्धवचनात्सिद्धमिति चेदुत्सर्गलक्षणानामनुदेशः कर्तव्यः। पद्धाम एधीति।
ननु चैतदप्यसिद्धवचनात्सिद्धं। असिद्धवचनात्सिद्धमिति चेन्नान्यस्यासिद्धवचनादन्यस्य
भावः। असिद्धवचनात्सिद्धमिति चेत्तन्न। किं कारणं। नान्यस्यासिद्धवचनादन्यस्य भावः। न ह्यन्य
स्यासिद्धत्वादन्यस्य प्रादुर्भावो भवति। न हि देवदत्तस्य हंतरि हते देवदत्तस्य प्रादुर्भावो भवति।
तस्मात्स्थानिवद्वचनं। तस्मात्स्थानिवद्भावो वक्तव्यः। असिद्धत्वं चाद्धाम एधि त्वत्र स्थानिवद्भा
वः वाच्यः। अघोषि इत्यसिद्धत्वं उक्तं वा किमुक्तं। स्थानिवद्वचनानर्थक्यं शास्त्रासिद्धत्वादिति
विषम उपन्यासः। युक्तं तत्र यदेकादेशशास्त्रं तु शास्त्रे असिद्धं स्यात्। अन्यदन्यस्मिन्। इह
पुनरयुक्तं। कथं हि तदेव नाम तस्मिन्नसिद्धं स्यात्। तदेव चापि तस्मिन्नसिद्धं भवति। वक्ष्यति
ह्याचार्यः। चिणो लुकि तग्रहणानर्थक्यं संघातस्याप्रत्ययत्वात्तलोपस्य चासिद्धत्वादिति। चि

॥१८

श्री बीजयति बरा

णो लुक्। चिणो लुक्यवासिद्धो भवति। कामं अतिदिश्यतां वा सत्त्वा सत्त्वापि नेह भारोऽस्ति। कस्मा
द्वाक्यशेषो वाक्यं वक्त्रधीनं हि। अथवा वतिनिर्देशोऽयं। कामचारश्च भवतिनिर्देशे वाक्यशेषं
समर्थयितुम्। तद्यथा। उशीनरवन्मद्रेषु यवाः संति न संतीति। मातृवदस्याः कलाः संति न संती
ति। एवमिहापि स्थानिवद्भवति स्थानिवन्न भवतीति वाक्यशेषं समर्थयिष्यामहे। इह तावत्
द्धाम एधीति। यथा स्थानिनि यणादेशो भवतीति एवमादेशेऽपि भवति। किं पुनरनंतस्य विधिं
प्रति स्थानिवद्भावः। आहोस्वित्पूर्वमात्रस्य। कश्चात्र विशेषः। अनंतरस्येति चेदेकान
नुदात्तद्विगुस्वरनिघातेषु उपसंख्यानं। अनंतरस्येति चेत्। एकानुदात्तद्विगुस्वर इगति
निघातेषूपसंख्यानं कर्तव्यम्। एकानुदात्त लुनीहि अत्रानुदात्तं पदमेकवर्जमित्येष स्वरो न
प्राप्नोति द्विगुस्वर पंचारत्न्या दशारत्न्यः इगंतकाल इत्येष स्वरो न प्राप्नोति गतिनिघात लुनीह्यत्र

×घात२

यदा लुनीह्यत्र तिङ्ङ्चोदात्तवती त्येषस्वरो न प्राप्नोति। अस्तु तर्हि पूर्वमात्रस्य। पूर्वमात्रस्येति चेदु
पधाह्रस्वत्वं। पूर्वमात्रस्येति चेदुपधाह्रस्वत्वं वक्तव्यं। वादितवंतं प्रयोजितवान्। अवीवदद्वीणां प
रिवादकेन। किं पुनः कारणं न सिध्यति। योसौ णौ णिलुप्यते तस्य स्थानिवद्भावात् ह्रस्वत्वं न प्रा
प्नोति। गुरुसंज्ञा च। गुरुसंज्ञा च न सिध्यति। शिक्षा। घ्रापित्वा न। घ्रदान्। ध्वस्मान्। ध्वस्मा। हलोनं
तराः संयोग इति संयोगसंज्ञा। संयोगे गुरु इति गुरुसंज्ञा। गुरोरिति प्लुतो न प्राप्नोति। ननु च य
स्याप्यनंतरस्य विधिं प्रति स्थानिवद्भावः तस्याप्यनंतरलक्षणे विधिः संयोगसंज्ञाविधेया। न वा
संयोगस्यापूर्वविधित्वात्। न वा एष दोषः। किं कारणं। संयोगस्यापूर्वविधित्वात्। न पूर्वविधिः
संयोगः। किं तर्हि पूर्वपरविधिः संयोगः। एकादेशस्योपसंख्यानं। एकादेशस्योपसंख्यानं कर्त
व्यं। आयसौ। गोमतौ। बाभ्रवौ। आनडुहौ। पादौ। उदवाहौ। एकादेशे कृते तस्मा मागमौ पञ्चवक्त्र

स्येते विधयः प्राप्नुवंति। किं पुनः कारणं न सिध्यति। उभयनिमित्तत्वात्। अजादेशः परनिमित्तक
इत्युच्यते। उभयनिमित्तश्चायं। उभयादेशाच्चा। अचः आदेश इत्युच्यते। अचोश्चायमादेशः। नैष
दोषः। यत्रावयुच्यते उभयनिमित्तत्वादिति। द्वयस्य ग्रामे नगरे वा अनेकं कार्यं भवति। द्वाक्रो
त्यसौ ततोऽन्यतरव्यपदेशं लभते। तद्यथा गुरुनिमित्तं वसामः। अध्ययननिमित्तं वसाम इति। यद्यु
च्यते उभयौ। यथा देवदत्तस्य पुत्रः। देवदत्ताया पुत्र इति। अथ हलचोरादेशः स्थानिवद्भवति उता
हो न। कश्चात्र विशेषः। हलचोरादेशः स्थानिवदिति चेद्दिंशेनेत्तिलोपएकादेशः। हलचोरादेश
स्थानिवदिति। देशो यत्र वचिति। इहयोः इयोः षष्ठीनिर्दिष्टयोः प्रसंगे न भवति। लक्षते सावन्यतरता व्य
पदेशः। तत्र चेद्दिंशेतेत्तिलोपएकादेशेष्वकृत्यः। विंशकः। विंशीशता। विंशः। स्थूलादीनां यणादि
लोपेवादेशः। स्थूलादीनां यणादिलोपे ह्रलेवादेशोवक्तव्यः। स्थवीयान्। यवीयान्। केकयमित्रयो

रियादेशेणत्वंकैकयमित्रय्वोरियादेशाएत्वंनसिध्यति।कैकेयः।मैत्रेयः।अचीत्येत्वंनसिध्यति।
उत्तरपदलोपेच।उत्तरपदलोपेचदोषोभवति।दध्युपसिक्ताःसक्तवः दधिसक्तवः।अचीति
यणादेशःप्राप्नोति।यङ्लोपेयलोपे यङुवङः।यङ्लोपेयलोपे यङुवङोननसिध्यंति।चेच्यः।नेन्यः।
चेक्षियः।चेक्रियः।लोलुवः।पोपुवः।अचीतियणियङुवङोनसिध्यंति।अस्तुतर्हिनस्थानि
वत्।अस्थानिवत्त्वेयङ्लोपेगुणवृद्धिप्रतिषेधः।अस्थानिवत्त्वेयङ्लोपेगुणवृद्ध्योःप्रतिषे
धोवक्तव्यः।लोलुवः।पोपुवः।सरीसृपः।मरीमृजइति।नैषदोषः।नधातुलोपआर्धधातु
कइतिप्रतिषेधोभविष्यति।किंपुनराश्रीयमाणायांप्रकृतौस्थानिवद्भवति।आहोस्वि
दविशेषेण।कश्चात्रविशेषः।अविशेषेणस्थानिवदितिचेल्लोपयणादेशेगुरुविधिः।अवि
शेषेणस्थानिवदितिचेल्लोपयणादेशयोर्गुरुविधिर्नसिध्यति।श्लैष्मा।उष्णा।पित्रा।दध्यश्व



मध्वा।हलोनंतराःसंयोगइतिसंयोगसंज्ञा।संयोगेगुर्वितिगुरुसंज्ञा।गुरोरितिप्लुतोनप्राप्नो
ति।द्विवचनादयश्चप्रतिषेधे।द्विवचनादयश्चप्रतिषेधेवक्तव्याः।द्विर्वचनेवरेयलोपइति
क्सलोपेलुग्वचनं।क्सलोपेलुग्वक्तव्यः।अदुग्ध।अदुग्धाः।लुग्वादुहदिहलिहगुहाम्
नेपदेदन्त्यइति।हंतेर्घत्वं।हंतेश्चघत्वंवक्तव्यम्।घ्नंति।घ्नंतु।अघ्नन्।अस्तुतर्हिआश्रीयमा
णायांप्रकृताविति।ग्रहणेषुस्थानिवदितिचेत्।जग्धादिषुआदेशप्रतिषेधः।ग्रहणेषुस्थानिव
दितिचेत्जग्ध्यादिषुआदेशस्यप्रतिषेधोवक्तव्यः।निराघसमाघ।अदोजग्धिर्ल्यप्तिकितीति
जग्धिभावःप्राप्नोति।यणादेशेऽल्लोपेत्वानुनासिकात्वप्रतिषेधः।यणादेशेऽल्लोपेत्वानुनासि
कात्वानांप्रतिषेधोवक्तव्यः।वाय्वोः।अध्वर्य्वोः।लोपोव्योर्वलीतियलोपःप्राप्नोति।अल्लोपःअ
कुर्विआशी।अक्ष्याशी।अनित्यंकरोति।येचलुकारलोपःप्राप्नोति।ईत्वेअलुनित्राशी।अणु

न्यासोऽईहल्स्य घोरिति लत्वं प्राप्नोति। अनुनासिकात्वा अजन्ति आशां। अजन्याशां यदि नाषेत्यनु
नासिकात्वं प्राप्नोति। रायाच प्रतिषेधश्च। राया। आत्वस्य च प्रतिषेधो वक्तव्यः। रायि। आशां। राया
शांरायोदल्लीत्यात्वं प्राप्नोति। दीर्घयिलोपप्रतिषेधः। दीर्घयिलोपस्य प्रतिषेधो वक्तव्यः। यो
येनामहिमवतः। अष्टेगेतद्यान्नसोप्यीहिमवानिति। योऽनाश्रयदीर्घत्वेकृते ईतिलोपः प्राप्नो
ति। अतोदीर्घयिलोपवचनं। अतोदीर्घयिलोपो वक्तव्यः। गार्गम्यांवात्साभ्यां। दीर्घेकृते आपत्य
स्य च तद्धितेनातीति प्रतिषेधः प्राप्नोति। नैषदोषः। आश्रीयतेऽत्र सहलितः। तद्धितइति। सर्वेषामे
षपरिहारः। उक्तं विधिग्रहणस्य प्रयोजनं। विधिमात्रेस्थानिवद्यथास्यात्। अनाश्रीयमाणा
यां प्रकृताविति। अथवा पुनरस्तु अविशेषेणस्थानिवदिति। ननु चोक्तम विशेषेण स्थानिवदि
ति चेल्लोपयणोद्गुरुविधिः। द्विर्वचनादयश्च। क्सलोपल्लुग्वचनं। दन्तेर्घत्वमिति। नैषदोषः।



यत्तावदुच्यते। अविशेषेणस्थानिवदितिचेल्लोपयणोद्गुरुविधिरिति। उक्तमेतत्। नवासंयो
गस्यापूर्वविधित्वादिति। यदप्युच्यते द्विर्वचनादयश्च प्रतिषेधे वक्तव्याइति। उच्यंते न्यासएव क्स
लोपल्लुग्वचनमिति। क्रियते न्यासएव दन्तेर्घत्वमिति। सप्तमेपरिहारं वक्ष्यति। अचः परस्मिन्पूर्व
विधौ॥ ॥न पदान्तद्विर्वचन॥ ॥पदान्तविधिंप्रति न स्थानिवदित्युच्यते। तत्रैवं तस्थानिति रुः प्राप्नो
ति। नैषदोषः। रुसंज्ञात्र बाधिका न विष्यति। तस्मैमत्वर्थइति। अकारान्तमेतद्रुसंज्ञां प्रति पद
संज्ञां प्रति सकारान्तं। ननु चैवं विज्ञायते। यः संप्रतिपदान्तइति। कर्मसाधनस्य विधिशब्दस्योपादा
नएतदेवंस्यात्। अयं च विधिशब्दोस्त्येव कर्मसाधनः। विधीयते विधिरिति। अस्ति भावसाधनः। वि
धानं विधिरिति। तत्र भावसाधनस्य विधिशब्दस्योपादान एषदोषो भवति। इहच अहलवंधमहल
वध्वेधकारस्य ऊरत्वं प्राप्नोति। अस्तिपुनः किंचिद्भावसाधनस्य विधिशब्दस्योपादाने सतीष्टं सं

ग्रहणं।आहोस्वित्विघातमेव।अस्तीत्याह।इह हि कानिसंतियानिसंति।कोस्तः।योस्तइति।यासौपर
ताथकारावकारावाश्रूयेते।सनञ्पुस्तेताषडिकश्चापिसिद्धोनवति।वाचिकस्तुनसिध्यति।वाचिक
षडिकोनसंवदेते कर्तव्योत्र यत्नः।कथंब्रह्मबंधवा ब्रह्मबंधवे।ऊनयतेः आम्रेयनांतादिवरिति
कथंवतस्वान्।नैवविज्ञायेत।पदस्यांतः पदांतः पदांतविधिंप्रतीति।कथंतर्हि पदे अंतः पदांतः।
पदांतविधिः प्रतीति।अथवायथैवान्यान्यपिपदकार्याणि उपप्लवंते रुत्वं जश्त्वं च।एवमिदम
पिपदकार्यं उपप्लोष्यते।किंसंज्ञानाम।वरेयलोपविधिंप्रतिनस्थानिवद्भवतीति उच्यते तत्र
ते अप्सुयायावरः प्रवपेत पिंडान्।अवर्णलोपविधिंप्रतिस्थानिवत्स्याव।नैषदोषः।नैवंविज्ञा
यतेवरेयलोपविधिंप्रतिनस्थानिवद्भवतीति।कथंतर्हि वरे अयलोपविधिंप्रतीति।किमिद
मयलोपविधिंप्रतीति।अवर्णलोपविधिंप्रतीति।यलोपविधिंप्रतीति।अथवायोगविभागःक

६२

रिष्यते वरे लुप्तं नस्थानिवत्।इदंतर्हि ततो यलोपविधिं च प्रतिनस्थानिवदिति।यलोपे किमुदाह
रणं।कंडूयतेरप्रत्ययः कंडूरिति।नैतदस्ति।प्रघौ।लुप्तंनस्थानिवत्।इदंतर्हि सौरी बलाका।नैतद
स्ति।उपधात्वविधिंप्रतिनस्थानिवत्।इदंतर्हिप्रयोजनं।आदित्यः।नैतदस्ति।पूर्वत्रासिद्धेनस्था
निवत्।इदंतर्हिकंडूतिः।वल्गूतिः।नैतदस्तिप्रयोजनं।कंडूया वल्गूया।इतिनवितव्यम्।इदंत
र्हि कंडूयतेः क्तिच् ब्राह्मणकंडूतिः क्षत्रियकंडूतिः।प्रतिषेधे स्वरदीर्घयलोपेषु लोपाजादेशो न
स्थानिवद्भवतीति वक्तव्यम्।स्वर।आकर्षकः।चिकीर्षकः।योह्यन्य आदेशः स्थानिवदेवासौ भव
ति।पंचारत्निः दशारत्निः।स्वरदीर्घ।प्रतिदीव्ना।प्रतिदीव्ने।योह्यन्य आदेशः स्थानिवदेवासौ भवति।
किर्योः गिर्योः।दीर्घ।यलोप।ब्राह्मणकंडूतिः क्षत्रियकंडूतिः।योह्यन्य आदेशः स्थानिवदेवासौ भव
ति।वाय्वोः अध्वर्य्वोरिति।नत्वांतर्हि क्विलुक्कर्म।नवक्तव्यम्।इह हि लोपोपि प्रकृतः आदेशोपि।विधिग्रह

णमपि प्रकृतमनुवर्त्तते। दीर्घादयोपि निर्दिश्यन्ते। केवलं तत्रापि संबंधमात्रं कर्त्तव्यमूः स्वरदीर्घलोप
विधिषु लोपाजादेशो न स्थानिवदिति। आनुपूर्व्येण संनिविष्टानां यथेष्टमभिसंबंधः शक्यते क
र्त्तुं न चैतान्यानुपूर्व्येण संनिविष्टानि। अनानुपूर्व्येणापि संनिविष्टानां यथेष्टमभिसंबंधो भ
वति। तद्यथा। अनड्वाहमुदहारि या त्वं हरसि शिरसा कुंभं भगिनि साचीनमभिधावंतमद्राक्षी
रिति। तस्य यथेष्टमभिसंबंधो भवति। उदहारि भगिनि या त्वं कुंभं हरसि शिरसा अनड्वाहं साची
नमभिधावंतमद्राक्षीरिति। क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानं। क्विलुगुपधात्वच
ङ्परनिर्ह्रासकुत्वेषूपसंख्यानं कर्त्तव्यम्। क्वौ किमुदाहरणं। कंडूयतेरप्रत्ययः कंडूरिति। नैतद
स्ति। यलोपविधिं प्रति स्थानिवत्त्वात्। इदं तर्हि पिपठिषतेरप्रत्ययः पिपठीः। नैतदस्ति। दीर्घविधिं प्रति
न स्थानिवत्। इदं तर्हि लावयतेः लौः पावयतेः पौः। नैतदस्ति। अकृत्वा वृद्ध्यावादेशौ णिलोपः प्रत्यय



लक्षणेन वृद्धिर्न भविष्यति। इदं तर्हि लवमाचष्टे — यति। लवयतेरप्रत्ययः लौः पौः। स्थानिवद्भावाण्णेर्
एतन्न प्राप्नोति। क्वौ लुप्तं न स्थानिवदिति भवति। एवमपि न सिध्यति। कथं। क्वौ लुप्तं न स्थानिवदिति। कथं त
र्हि क्वौ विधिं प्रति न स्थानिवदिति। लुकि किमुदाहरणं। बिंबं बदरं। नैतदस्ति। पुंवद्भावेनाप्येतत्सिद्धं।
इदं तर्हि आमलकं। एतदपि नास्ति। वक्ष्यत्येतत् फले लुग्वचनानर्थक्यम्। प्रकृत्यंतरत्वादिति। इदं त
र्हि पंचभिः पट्वीभिः क्रीतः पंचपटुः दशपटुरिति। ननु चैतदपि पुंवद्भावेनैव सिद्धं। कथं पुंवद्भावः। भस्या
ढे तद्धिते पुंवद्भवतीति। भस्येत्युच्यते। यजादौ च भं भवति। न चात्र यजादिं पश्यामः। प्रत्ययलक्षणेन।
न वर्णाश्रये नास्ति प्रत्ययलक्षणं। एवं तर्हि गकुत्सिस्थित्येवं भविष्यति। ठकुत्सिस्थितेत्युच्यते। न चा
त्र ककुत्सि पश्यामः। प्रत्ययलक्षणेन। न लुमता तस्मिन्निति प्रत्ययलक्षणस्य प्रतिषेधः। न खल्वप्य
वश्यं गोव क्रीत प्रत्ययः। क्रीतघ्नपि एव वा तद्धिताः। किं तर्ह्यन्योपि तद्धिताः। यल्लुकं प्रयोजयंतीपं

चेंद्राण्यो देवता अस्येति। पंचेंद्रः दशेंद्रः। पंचाग्निः दशाग्निः। उपधात्वे किमुदाहरणं। पिपठिषतेरप्रत्ययः
पिपठीरिति। नैतदस्ति। दीर्घविधिं प्रति न स्थानिवत्। इदं तर्हि सौरी बलाका। नैतदस्ति। यलोपविधिं प्रति न स्था
निवत्। इदं तर्हि पारिखीयः। चङ्परनिर्ह्रसि चोपसंख्यानं कर्तव्यम्। वादितवंतं प्रयोजितवान्। अवीव
दद्वीणां परिवादकेन। किं पुनः कारणं न सिध्यति। योसौ णौ णिर्लुप्यते तस्य स्थानिवद्भावाद्ध्रस्वत्वं न प्राप्नो
ति। ननु चैतदप्युपधात्वविधिं प्रति न स्थानिवदित्येव सिद्धं। विशेषत एतद्वक्तव्यम्। धात्वप्रत्ययविधाविति। इ
ह मा भूत् पटयति लघयतीति। क्वौ चोपसंख्यानं कर्तव्यम्। अर्चयतेरर्कः। मर्चयतेर्मर्कः। नैतद्वक्तव्यं।
उणादिक एष कर्तव्यः। तस्मिन्नाष्टमिकं कुत्वम्। एतदपि चावश्यं वक्तव्यं न प्राप्नोति। पूर्वत्रासि
द्धे च। पूर्वत्रासिद्धे च न स्थानिवदिति वक्तव्यम्। किं प्रयोजनं। प्रयोजनं क्सलोपः सलोपे। क्सलोपः सलो
पे प्रयोजनं। अदुग्ध अदुग्धाः। लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्य इति लुग्ग्रहणं न कर्तव्यम्

४५

भवति। दध्याकारलोपे आदिचतुर्थत्वे प्रयोजनं। धत्से धद्ध्वे धद्ध्वमिति। दधस्तथोश्चेति चकारो न कर्तव्यो
भवति। हलो यमां यमि लोपे प्रयोजनं। आदित्यः। हलो यमां यमि लोपः सिद्धो भवति। अल्लोपणिलोपौ
संयोगान्तलोपप्रभृतिषु। प्रयोजनं। पापच्यतेः पापक्तिः। यायज्यतेः यायष्टिः। पाचयतेः पाक्तिः। याजयतेः या
ष्टिः। द्विर्वचनादीनि च। द्विर्वचनादीनि न पठितव्यानि भवंति। पूर्वत्रासिद्धेनैव सिद्धानि भवंति। किमविशेषे
ण चेत्याह। वरे यलोपस्वरवर्जं। वरे यलोपं स्वरं च वर्जयित्वा। तस्य दोषः संयोगादिलोपलत्वणत्वेषु। तस्यैव
लक्षणस्य दोषः संयोगादिलोपलत्वणत्वेषु। संयोगादिलोपः। काक्यर्थं वास्यर्थं। स्कोः संयोगाद्योरन्ते चेति लो
पः प्राप्नोति। लत्वं। निगार्यते। निगाल्यते। अचि विभाषेति लत्वं न प्राप्नोति। णत्वं। माषवपनी व्रीहिवपनी। प्रा
तिपदिकान्तस्येति णत्वं प्राप्नोति। न पदान्तद्विर्वचने॥ ।द्विर्वचनेचि॥ ।।आदेशः स्थानिवदनुदेशात्तद्वतो द्विर्व
चनं। आदेशः स्थानिवदनुदेशात्तद्वतः कियतः आदेशवतो द्विर्वचनं प्राप्नोति। तत्र को दोषः। तत्राभ्यासरूपं

नसिध्यति। चक्रतुः चक्रुरिति। अतुसुसोर्ग्रहणं ज्ञापकं रूपस्थानिवद्भावस्य। यदयमजग्रहणं करोति। त
ज्ज्ञापयत्याचार्यः रूपं स्थानिवद्भवतीति। कथं कृत्वा ज्ञापकं। अजग्रहणस्यैतत्प्रयोजनं। इदमाह
तज्ज्ञायत दध्यायत इति। यदि रूपं स्थानिवद्भवति। ततोऽजग्रहणं अर्थवद्भवति। अथ हि कार्यं ना
र्थोऽजग्रहणेन। जवसेवात्र द्विर्वचनं। तत्र गाङः प्रतिषेधः। तत्र गाङ्प्रतिषेधो वक्तव्यः। अधिजगे।
इवर्णाभ्यासतां प्राप्नोति। न वक्तव्यः। गाङ्कुटीति ङिल्लकारकोऽनिर्देशः। लिटि ङिल्लकारादाविति। इ
त्विजन्तादिवादिनामधातुषु अभ्यासरूपं। क्वेजंत दिवादिनामधातुष्वभ्यासरूपं नसिध्यति। क्व
ति। अचिकीर्तत्। क्वेति। एजंता। जग्ले। मम्ले। एजंता। दिवादि। दुद्यूषति। सुस्यूषति। दिवादिनामधा
तुः। नवनमिच्छति। नवनीयति। नवनीयतेः सन्। निनवनीयिषति। एवं तर्हि प्रत्यय इति वक्ष्यामि। प्र
त्यय इति चेत्कृत्स्नेजंतनामधातुष्वभ्यासरूपं। प्रत्यय इति चेत्कृत्स्नजंतनामधातुष्वभ्यासरूपं नसि
ध्यति।



दिवादय एके परिहृताः। एवं तर्हि द्विर्वचननिमित्तेऽचि अजादेशः स्थानिवदिति वक्ष्यामि। स तर्हि नि
मित्तशब्द उपादेयः। न ह्यंतरेण निमित्तशब्दं निमित्तार्थो गम्यते। अंतरेणापि निमित्तशब्दं निमित्तार्थो
गम्यते। तद्यथा। दधित्रपुसं प्रत्यक्षो ज्वरः। ज्वरनिमित्तमिति गम्यते। नड्वलोदकं पादरोगः। पादरोगनि
मित्तमिति गम्यते। आयुर्घृतं। आयुषो निमित्तमिति गम्यते। अथवा अकारो मत्वर्थीयः। द्विर्वचनम
स्तिसोयं द्विर्वचनः। द्विर्वचन इति। एवमपि न ज्ञायते। कियन्तमसौ कालं स्थानिवद्भवतीति। यः पुनराह
द्विर्वचने कर्तव्य इति। कृते तस्य द्विर्वचने स्थानिवत्त्वं न भविष्यति। एवं तर्हि प्रतिषेधः प्रकृतः सोऽनुवर्तिष्य
ते। क्व प्रकृतः। न पदान्तद्विर्वचनेति। द्विर्वचननिमित्तेऽचि अजादेशो न भवतीति। एवमपि न ज्ञायते।
कियन्तमसौ कालमादेशो न भवतीति। यः पुनराह। द्विर्वचने कर्तव्य इति। कृते तस्य द्विर्वचने अजा
देशो न भविष्यति। एवं तर्हि उत्सर्गेण न क्रियते। प्रत्ययश्च विशेष्यते द्विर्वचनं च। कथं पुनरेकेन यत्नेनो

न्नयं लव्यं। लव्यमित्यादि॥ कथं। एकशेषनिर्देशात्। एकशेषनिर्देशोयं द्विर्वचनं च द्विर्वचनं च
द्विर्वचनं। द्विर्वचने न कर्तव्ये द्विर्वचने च प्रसज्यत इति द्विर्वचननिमित्ते अचि स्थानिवद्भवति। द्वि
र्वचननिमित्ते चि स्थानिवदिति चेणौ स्थानिवद्वचनं। द्विर्वचननिमित्ते ऽचि स्थानिवदिति चे
णौ स्थानिवद्भावो वक्तव्यः। अवजुतावयिषति। अवजुहावयिषति। न वक्तव्यः। ओः पुयण्जि
श्रुवचनं ज्ञापकं णौ स्थानिवद्भावस्य यदयमोः पुयण्ज्यपर इत्याह तज्ज्ञापयत्याचार्यः
भवति णौ स्थानिवदिति। यद्येतज्ज्ञाप्यते। अचिकीर्तत्। अत्रापि प्राप्नोति। तुल्यजातीयस्य ज्ञा
पकं। कश्च तुल्यजातीयः। यथाजातीयकाः पुयण्जः। कथंजातीयकाश्चैते। अवर्णपराः। क
थं ज्ञायते। अनैमित्तिकमात्वं। शिति तु प्रतिषेधः॥ कानि पुनरस्य योगस्य प्रयोजनानि।
पपतुः पपुः। तस्थतुः तस्थुः। जग्मतुः जग्मुः। आटिटत्। आशिशिरत्। चक्रतुः चक्रुरिति। आ



ल्लोपोपधालोपणिलोपयणादेशेषु कृतेष्वकृत्वा द्विर्वचनं न प्राप्नोति। स्थानिवद्भावाद्भवति। नै
तानि संति प्रयोजनानि। पूर्वविप्रतिप्रतिषेधेनाप्येतानि सिद्धानि। कथं। वक्ष्यति ह्याचार्यः। द्विर्वच
नं यणयवायावादेशाल्लोपोपधालोपणिलोपकिकिनोरुत्वेभ्य इति। स पूर्वविप्रतिषेधो न पठित
व्यो भवति। किं पुनरत्र ज्यायः। स्थानिवद्भाव एव ज्यायान्। पूर्वविप्रतिषेधे हि सति इदं वक्तव्यं स्यात्
उदीदाद्ध्वास्यत्तु भवति चुक्षुरादित्यास स्यति। ननु च त्वयापि इदं वक्तव्यं परार्थं मम भविष्यति।
सन्यतः इद्भवतीति। ममापि तर्हि इदं परार्थं भविष्यति। उत्परस्यातः। इति चेति। इदं मपि त्वया वक्त
व्यं यत्समानाश्रयं तदर्थं द्विप्रतिषेधे। संप्रियविषयेनीस्येवमर्थं। तस्मात्स्थानिवदिति एव पक्षो
ज्यायान्॥ द्विर्वचनेचि॥ ॥इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्याय
स्य प्रथमे पादे अष्टममाह्निकं॥ ॥अदर्शनं लोपः॥ ॥अर्थस्य संज्ञाकरणमाहोस्विच्छब्दस्य मा भूदिति

इतरेतराश्रयं च भवति। का इतरेतराश्रयता। सतोऽदर्शनस्य संज्ञया भवितव्यम्। संज्ञया चादर्शनं भा
व्यते। तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च न प्रकल्पंते। लोपसंज्ञायामर्थसतोरुक्तं।
किमुक्तं। अर्थस्य तावदुक्तमितिकरणोऽर्थनिर्देशार्थ इति। सतोऽप्युक्तं। सिद्धं तु नित्यशब्दत्वादिति।
नित्याः शब्दाः। नित्येषु च शब्देषु सतोऽदर्शनस्य संज्ञा क्रियते। न संज्ञयाऽदर्शनं विभाव्यते। सर्वप्रसंग
स्तु सर्वस्यान्यत्रादृष्टत्वात्। सर्वप्रसंगस्तु भवति। सर्वस्यादर्शनस्य लोपसंज्ञा प्रा[illegible]प्नोति। किं कारणम्।
सर्वस्यान्यत्रादृष्टत्वात्। सर्वो हि शब्दो योऽस्य प्रयोगविषयः स ततोऽन्यत्र दृश्यते। त्रपु जतु इत्यत्राणो
दर्शनं। तत्रादर्शनं लोप इति लोपसंज्ञा प्राप्नोति। तत्र को दोषः। तत्र प्रत्ययलक्षणप्रतिषेधः। तत्र
प्रत्ययलक्षणं कार्यं प्राप्नोति। तस्य प्रतिषेधो वक्तव्यः। अचो ञ्णितीति वृद्धिः प्राप्नोति। नैष दोषः। अंग
स्यांगस्याचो वृद्धिरुच्यते। यस्माच्च प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं भवति। यस्माच्चात्र प्रत्ययविधिर्न त

५१

त्प्रत्यये परतः। यच्च प्रत्यये परतः न तस्मात्प्रत्ययविधिः। क्विपस्तर्ह्यदर्शनं तत्रादर्शनं लोप इति लोपसं
ज्ञा प्राप्नोति। तत्र को दोषः। तत्र प्रत्ययलक्षणप्रतिषेधः। तत्र प्रत्ययलक्षणं कार्यं प्राप्नोति। तस्य प्रतिषे
धो वक्तव्यः। ह्रस्वस्य पिति कृति तुग्भवतीति तुक् प्राप्नोति। सिद्धं तु प्रसक्तादर्शनस्य लोपसंज्ञित्वात्। सि
द्धमेतत्। कथं। प्रसक्तादर्शनं लोपसंज्ञं भवतीति वक्तव्यं। यदि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्य
ते। ग्रामणीः सेनानीः। अत्र वृद्धिः प्राप्नोति। प्रसक्तादर्शनं लोपसंज्ञं भवति षष्ठीनिर्दिष्टस्य। यदि ष
ष्ठीनिर्दिष्टस्येत्युच्यते। चाह लोप एवेत्यवधारणं। चादिलोपे विभाषेत्यत्र लोपसंज्ञा न प्राप्नोति।
अथ प्रसक्तादर्शनं लोपसंज्ञं भवतीत्युच्यमाने कथमेवैतत्सिध्यति। को हि नाम चस्य प्रसंगः। यत्र
गम्यते चार्थो न च प्रयुज्यते। अस्तु तर्हि प्रसक्तादर्शनं लोपसंज्ञं भवतीत्येव। कथं ग्रामणीः सेनानीरि
ति। ग्रामणीः प्रसंगः क्विपा सो बाध्यते। अदर्शनं लोपः॥ ।प्रत्ययस्य लुक्श्लुलुपः॥ ।प्रत्ययग्रहणं किमर्थं।

लुमतिग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थं।लुमति प्रत्ययग्रहणं क्रियते।अप्रत्ययस्यैताः संज्ञा
मा भूवन्निति।किं प्रयोजनं।प्रयोजनं तद्धितलुकि कंसीयपरशव्ययोर्लुकि च गोप्रकृतिनि
वृत्त्यर्थं।तद्धितलुकि गोनिवृत्त्यर्थं कंसीयपरशव्ययोश्च लुकि प्रकृतिनिवृत्त्यर्थं।लुक्तद्धि
तलुकीति गोरपि लुक् प्राप्नोति।प्रत्ययग्रहणान्न भवति।कंसीयपरशव्ययोर्यञञोर्लुक्चे
ति प्रकृतेरपि लुक् प्राप्नोति।प्रत्ययग्रहणान्न भवति।गोनिवृत्त्यर्थेन तावन्नार्थः।योगवि
भागात्सिद्धं।योगविभागः करिष्यते।गोरुपसर्जनस्य।गोन्तस्य प्रातिपदिकस्य ह्रस्वो भवति।त
तः स्त्रियाः।स्त्रीप्रत्ययान्तस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवति।ततो लुक्तद्धितलुकीति।
स्त्रिया इति वर्त्तते।गोरिति निवृत्तं।कंसीयपरशव्ययोर्विशिष्टनिर्देशात्सिद्धं।कंसीयपरशव्य
योरपि विशिष्टनिर्देशः कर्त्तव्यः।कंसीयपरशव्ययोर्यञञौ भवतः।छयतोश्च लुग्भवतीति।सत्या

५८

५२

वद्वयं विशिष्टनिर्देशः कर्त्तव्यः।क्रियमाणेऽपि वै प्रत्ययग्रहणे उकारशब्दयोर्मा भूदिति।कमेः सः
कंसः।परान् शृणातीति परशुरिति।नैष दोषः।उणादयोऽव्युत्पन्नानि प्रातिपदिकानि।स एषोऽनन्या
र्थो विशिष्टनिर्देशः कर्त्तव्यः।प्रत्ययग्रहणं वा कर्त्तव्यं।उक्तं वा।किमुक्तं।आप्रातिपदिकग्रहणमं
गभपदसंज्ञार्थं।यच्छयोश्च लुगर्थमिति।षष्ठीनिर्देशार्थं तु।षष्ठीनिर्देशार्थं तर्हि प्रत्ययग्रहणं कर्त्त
व्यम्।षष्ठीनिर्देशो यथा प्रकल्पेत।अनिर्देशे हि षष्ठ्यर्थाप्रसिद्धिः।अक्रियमाणे हि प्रत्ययग्रहणे
षष्ठ्यर्थस्याप्रसिद्धिः स्यात्।कस्य स्थानेयोगत्वस्य।क्व पुनरिह षष्ठीनिर्देशार्थेनार्थः प्रत्ययग्रह
णेन।यावता सर्वत्रैव षष्ठ्युच्चार्यते।अणिञोस्तद्राजस्य घञञोः श्यापर इति।इह न काचित्षष्ठी
जनपदे लुबिति।अत्रापि प्रकृतं प्रत्ययग्रहणमनुवर्त्तते।क्व प्रकृतम्।प्रत्ययः परश्चेति।
तद्वै प्रथमानिर्दिष्टं।षष्ठीनिर्दिष्टेन चेहार्थः।आप्रातिपदिकादित्येषा पंचमी प्रत्ययइ

तिप्रथमायाः षष्ठीं प्रकल्पयिष्यति। तस्मादित्युत्तरस्येति। प्रत्ययविधिरयं न च प्रत्ययविधौ पंचम्यः
प्रकल्पिका भवंति। नायं प्रत्ययविधिः। विहितः प्रत्ययः प्रकृतश्चानुवर्त्तते। सर्वादेशार्थं वा वचन
प्रामाण्यात्। सर्वादेशार्थं तर्हि प्रत्ययग्रहणं कर्त्तव्यम्। लुक्श्लुलुपः सर्वादेशा यथा स्युः। अथ क्रि
यमाणेपि प्रत्ययग्रहणे कथमिव लुक्श्लुलुपः सर्वादेशाः स्युः। वचनप्रामाण्यात्। प्रत्ययग्रह
णसामर्थ्यात्। एतदपि नास्ति प्रयोजनं। आचार्यप्रवृत्तिर्ज्ञापयति लुक्श्लुलुपः सर्वादेशा भवं
तीति। यदयं लुग्वा दुहदिहलिहगुहामात्मनेपदे दंत्ये इति लोपे कृते लुकं शास्ति। उत्तरार्थं तु।
उत्तरार्थं तर्हि प्रत्ययग्रहणं कर्त्तव्यम्। क्रियते तत्रैव प्रत्ययलोपे प्रत्ययलक्षणमिति द्वितीयं
कर्त्तव्यम्। कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात्। एकदेशलोपे मा भूदिति। आघ्नीत सम
रायस्पोषेणाग्मीयेति। प्रत्ययस्य लुक्श्लुलुपः। ।प्रत्ययलोपे प्रत्ययलक्षणं। ।प्रत्ययग्रहणं किमर्थं।



लोपे प्रत्ययलक्षणमिति। यल्लुच्यते सोरथी वेदभीति गुरूपोत्तमलक्षणः ष्यङः प्रसज्येत। नैष दोषः। नैवं वि
ज्ञायते। लोपे प्रत्ययलक्षणं भवति। प्रत्ययस्य प्रादुर्विहति। किं तर्हि प्रत्ययो लक्षणं यस्य कार्यस्य
तल्लुप्तेपि भवतीति। इदं तर्हि प्रयोजनं। सति प्रत्यये यत्प्राप्नोति तत्प्रत्ययलक्षणेन यथा स्यात्। लो
पोत्तरकालं यत्प्राप्नोति तत्प्रत्ययलक्षणेन मा भूदिति। किं प्रयोजनम्। ग्रामणिकुलं सेनानिकु
लं। अंतरपदिके ह्रस्वत्वे कृते ह्रस्वस्य पिति कृति तुगिति तुक् प्राप्नोति। स मा भूदिति। यदि तर्हि स
ति प्रत्यये प्राप्नोति तत्प्रत्ययलक्षणेन भवति। लोपोत्तरं कालं यत्प्राप्नोति तन्न भवति। जगत् जन
गत् इत्यत्र तुक् प्राप्नोति। लोपोत्तरकालो ह्यत्र तुगागमः। तस्मान्नार्थ एवमर्थेन प्रत्ययग्रहणेन।
कस्मान्न भवति ग्रामणिकुलं सेनानिकुलं। बहिरंगं ह्रस्वत्वं। अंतरंगस्तुक्। असिद्धं बहिरंगमं
तरंगे। इदं तर्हि प्रयोजनं। कृत्स्नप्रत्ययलोपे प्रत्ययलक्षणं यथा स्यात्। एकदेशलोपे मा भूदिति।

आघ्नीत । संरायस्पोषेण ग्मीय । सर्वस्मिन्नपि योगे प्रत्ययग्रहणस्यैतत्प्रयोजनमुक्तं । अन्यतरच्छक्यम
कर्तुं । अथ द्वितीयं प्रत्ययग्रहणं किमर्थं । प्रत्ययलक्षणं यथा स्यात् । वर्णलक्षणं मा भूदिति । गवेहि
तं । गोहितं । रायः कुलं रैकुलमिति । किमर्थं पुनरिदमुच्यते । प्रत्ययलोपे प्रत्ययलक्षणवचनं सद
न्वाख्यानाच्छास्त्रस्य । प्रत्ययलोपे प्रत्ययलक्षणमित्युच्यते । सदन्वाख्यानाच्छास्त्रस्य । उगिदचां
सर्वनामस्थानेऽधातोरिति इहैव स्यात् । गोमन्तौ यवमन्तौ । गोमान् यवमान् इत्यत्र न स्यात् । इष्य
ते चस्मादिति । तत्त्वंतरेण यत्नं न सिध्यति । अतः प्रत्ययलोपे प्रत्ययलक्षणवचनं । एवमर्थमिदमु
च्यते । अस्ति प्रयोजनमेतत् । किं तर्हीति । लुक्युपसंख्यानं । लुकि उपसंख्यानं कर्त्तव्यं । पंचसप्त । किं
पुनः कारणं न सिध्यति । लोपे हि विधानं । लोपे हि प्रत्ययलक्षणं विधीयते । तेन लुकि न प्राप्नोति । न
वादर्शनस्य लोपसंज्ञित्वात् । न वा कर्त्तव्यमिमं । किं कारणं । अदर्शनस्य लोपसंज्ञित्वात् । अदर्शनं लो

६०

पसंज्ञं भवतीत्युच्यते । लुमत्संज्ञाश्चाप्यदर्शनस्य क्रियन्ते । तेन लुक्यपि भविष्यति । यद्येवं । प्रत्ययाद
र्शनं तु लुमत्संज्ञं । प्रत्ययादर्शनं तु लुमत्संज्ञमपि प्राप्नोति । तत्र को दोषः । तत्र लुकि श्लुविधिप्रति
षेधः । तत्र लुकि श्लुविधिरपि प्राप्नोति । स प्रतिषेध्यः । अत्ति हंति । श्लाविति द्विर्वचनं प्राप्नोति ।
न वा पृथक्संज्ञाकरणात् । न वा एष दोषः । किं कारणं । पृथक्संज्ञाकरणात् । पृथक्संज्ञाकरणसा
मर्थ्याद्धि लुकि श्लुविधिर्न भविष्यति । तस्माददर्शनसामान्याल्लोपसंज्ञा लुमत्संज्ञा अवगाहते । य
द्येवं तर्हि अदर्शनसामान्याल्लोपसंज्ञा लुमत्संज्ञा अवगाहते । एवं लुमत्संज्ञा अपि लोपसंज्ञाम
वगाहेरन् । तत्र को दोषः । अग्निमती गोमती । संपन्ना गोमती भूता । लुक्तद्धितलुकीति ङीपो लुक्
प्रसज्येत । ननु चात्रापि न वा पृथक्संज्ञाकरणादित्येव सिद्धं । यथैव तर्हि पृथक्संज्ञाकरणसाम
र्थ्याद्धि लुमत्संज्ञा लोपसंज्ञां नावगाहते एवं लोपसंज्ञापि लुमत्संज्ञां नावगाहेत । तत्र स एव दोषः । लुकु

पसंज्ञा न मिति। अस्त्यन्यलोपसंज्ञायाः पृथक्संज्ञाकरणे प्रयोजनं। किं लुमत्संज्ञास्वप्युच्यते तद्धोपमा
त्रमात्लृदिति सतोनिमित्ताभावात्पदसंज्ञाभावः। अस्त्यप्रत्ययं येषां कार्याणामनिमित्तं राजपुरुष इति तु
त्तोः लुमिति प्रतिषेधाद्धा। अथवा यदयं न लुमताङ्गस्येति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः। न वर्ति
लुकि प्रत्ययलक्षणमिति। प्रनिमित्तं स्यात्। राजपुरुष इति। अस्तु तस्याऽनिमित्तं यास्वादौ पद
मिति पदसंज्ञायां सुबन्तं पदमिति पदसंज्ञा सा न भविष्यति सत्यपि तस्मिन्प्रत्यये आसीत्। अनया न वि
प्रत्ययनयान भविष्यतीति लुग्ग्रहणं इदानीं प्रत्ययेयावत्तु एवावधेः स्वादौ पदमिति पदसंज्ञाभावनएव
सुबन्तं पदमिति। अस्ति च प्रत्ययलक्षणेन यजादि परत्वं तिल्लचेन संज्ञा प्राप्नोति। उग्दीर्घत्वयोश्च
विप्रतिषेधानुपपत्तिरेकयोगलक्षणे चात्परिवीरिति। उग्दीर्घयोश्च विप्रतिषेधो नोपपद्यते
क्व। परिवीरिति। किं कारणं। एकयोगलक्षणत्वात्। एकयोगलक्षणेनुग्दीर्घ वेड्हल्लुप्तप्रत्ययसर्वा

णि प्रत्ययाश्रयाणि कार्याणि पर्यवसन्नानि भवंति। तान्येतेन प्रत्युज्ज्ञाप्यंते। अनेनैव तु गनेनैव च
दीर्घत्वमिति तदेकलक्षणं भवतीति। एकयोगलक्षणानि च न प्रकल्प्यंते सिद्धं तु स्थानिसंज्ञानुदेशा
दन्यत्वावस्था। सिद्धमेतत्। कथं स्थानिसंज्ञा अन्यत्र तस्य भवतीति वक्ष्यमाणः। किं कृतं भवति। स त्रामा
त्रमनेन क्रियते यथा प्राप्तेत्तुग्दीर्घत्वे न भविष्यतः। तत्क्रमं भवति। यद्यप्येतदुच्यते। अथवैतर्हि स्थानि
वद्भावो नारभ्यते। स्थानिसंज्ञान्यत्र तस्या न लिंगाविति वक्ष्यामि। यदि स्थानिसंज्ञान्यत्र तस्य तु च्यते।
आङोयमहनः। आत्मनेपदं न भवतीति हंतेरेव स्यात्। वधेर्न स्यात्। न दिका विरुद्धं। ते संज्ञास्ति यावधेरि
ति द्विरेपत। हंतेरपि संज्ञास्ति। काहन्तिरेव। कथं स्वं रूपं शब्दस्याशब्दसंज्ञेति वचनात्। स्वरूपं शब्द
स्य संज्ञा भवतीति हंतेरपि हंतिः संज्ञा न भविष्यति। न संज्ञा। ङीष्प्रगोरा च विष्णु च सिद्धं। न संज्ञा ङीष्प्र
गोराच्चिष्णु च सिद्धं भवति। न संज्ञा राजः पुरुषो राजपुरुषः प्रत्ययलक्षणे न यचि भमिति भसंज्ञा प्रा

प्नोति। स्थानिसंज्ञान्यत्र तस्मान्नल्विधाविति वचनान्न भवति। ङीप्। चित्रायां जाता चित्रा प्रत्ययल
क्षणेनाऽणं तद्धितेति इकारः प्राप्नोति। स्थानिसंज्ञान्यत्र तस्मान्नल्विधाविति वचनान्न भवति। भू
वतं ङीप् प्रत्ययलक्षणेन यञंताद्धिष्फः प्राप्नोति। स्थानिसंज्ञान्यत्र तस्मान्नल्विधाविति वचना
न्न भवति। गोरा त्वा। गामिच्छतीति गव्यति प्रत्ययलक्षणेन अमि ओतो अम्शसोरिति आत्वं प्राप्नोति
स्थानिसंज्ञान्यत्र तस्मान्नल्विधाविति वचनान्न भवति। तस्य दीर्घोऽनकारलोपे त्वेन्विधयः।
तस्य तस्य लक्षणस्य दीर्घः। ऽनकारलोपं। आ ई च मन्निरो द्विलेवर्मन्। प्रत्ययलक्षणेन यचि
भमिति भसंज्ञा सिद्धा न भवति। स्थानिसंज्ञान्यत्र तस्मान्नल्विधाविति वचनान्न प्राप्नोति। इच्चां भा
शीः प्रत्ययलक्षणेन हल्ङी तीत्वं सिद्धं न भवति। स्थानिसंज्ञान्यत्र तस्मान्नल्विधाविति वचनान्न
प्राप्नोति। इमं अमट एटू। प्रत्ययलक्षणेन हल्ङीति इमं सिद्धं न भवति। स्थानिसंज्ञान्यत्र तस्मान



ल्विधाविति वचनान्न प्राप्नोति। स्त्रं च निषेधे। यथान्यासमेवास्तु ननु चोक्तं सतोऽनिमित्ता भा
वात्पदसंज्ञाभावः स्तुग्दीर्घयोश्च विप्रतिषेधानुपपत्तिरेकयोगलक्षणत्वात् परिवीरिति नै
ष दोषः। वक्ष्यति अत्र परिहारं। इहापि परिवीरिति शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं न भवि
ष्यति। कानि पुनरस्य योगस्य प्रयोजनानि। प्रयोजनमष्टकन्निलोपेऽमसमासे गुणवृद्धिदी
र्घत्वे मडादूश्त्वं विधयः। अष्टकलोपे शिलोपे च कृते नुम्। अमासे गुण वृद्धादी र्घत्वं। इमं अट
दोम्ताम् विधिरिति प्रयोजनानि। नुम्। अग्नेत्री तेवा जिनात्रीषधस्था। तानि पिंडानां नुम्। अ
मासे। हे अनडुन्। हे अनड्वान्। गुणः। अधोक्। अलेट्। वृद्धिः। न्यमार्ट्। दीर्घत्वं। अग्नेत्री तेवाजि
नात्रीषधस्था तानि पिंडानां। इमं। अमट एटू। अडाटो। अधोक्। अलेट्। एयः। ऊनः। आ विधिः।
अभिन्नोऽत्र अछिन्नोऽत्र। अत्र कृशि लोपयोः कृतयोः एते विधयो न प्राप्नुवंति। प्रत्ययलक्षणेन

नवंति।नैतानिसंतिप्रयोजनानि।स्थानिवद्भावेनाप्येतानिसिध्यंति।नसिध्यंति।आदेशःस्थानिवदि
त्युच्यते।नचलोपआदेशः।लोपोप्यादेशः।कथं।आदिश्यतेयःसआदेशः।लोपश्चाप्यादिश्यते।नचेल्लो
पआदेशः।दोषःखल्वपिस्यात्यदिलोपोनादेशःस्यात्।इहाचःपरस्मिन्पूर्वविधावित्येतस्ययो
गस्यभूयिष्ठानिलोपउदाहरणानितानिनस्युः।यत्रतर्हिस्थानिवद्भावोनास्तितदर्थमयंयो
गोवक्तव्यः।क्वचित्स्थानिवद्भावोनास्ति।योल्विधिः।किंप्रयोजनं।प्रयोजनंङौनकारलोपेचम
विधयः।भसंज्ञाङ्याप्सुप्सोराल्वेषुचेदानसंज्ञायातावन्नदोषःभवति।आचार्यप्रवृत्तिर्ज्ञापय
तिनप्रत्ययलक्षणेनसंज्ञाभवतीति।यदयंनङिसंबुद्ध्योरितिङौप्रतिषेधंशास्ति।ङौप्राति
नेवंविज्ञायते।अणंतादकारांताद्विति।कथंतर्हि।अण्णोकारइति।सुपिनैवंविज्ञायतेयजंता
दकारांतादिति।कथंतर्हि।सुप्योकारइति।गोरालपिनैवंविज्ञायते।अम्पचीति।कथंतर्हि।अच्य



मीति।प्रयोजनान्यपितर्हितानिनसंति।यत्तावदुच्यतेङौनकारलोपइति।क्रियतएतन्न्यासएव
नङिसंबुद्ध्योरिति।इदमपि।वक्ष्यत्येतत्।शासइदङ्हलोः।आशासःक्वाविति।इत्वम्।विधिरपि
हलीतिनिवृत्तं।यदिहलीतिनिवृत्तंचरणहानित्यत्रापिप्राप्नोति।एवंतर्हिचिनेत्यप्यनुवर्त्ति
ष्यते।नतर्हीदानीमयंयोगोवक्तव्यः।वक्तव्यश्च।किंप्रयोजनं।प्रत्ययग्रहणेयदुच्यतेतत्प्र
त्ययलक्षणेनयथास्यात्।शक्यंग्रहीत्वायदुच्यतेतत्प्रत्ययलक्षणेनमाभूदिति।किंप्रयोज
नं।शोभनादृषदोस्यसुदृषत्प्राह्मणः।आर्मनसी।अलोमाषसी।इत्येषस्वरोमाभूदिति।प्रत्य
लोपेप्रत्ययलक्षणं।।नलुमतांगस्य।।लुमतिप्रतिषेधएकपदस्वरस्योपसंख्यानं।लु
मतिप्रतिषेधएकपदस्वरस्योपसंख्यानंकर्तव्यम्।एकपदस्वरलुमतालुप्तेप्रत्ययलक्षणं।ए
कपदस्वरेचलुमतालुप्तेप्रत्ययलक्षणंनभवतीतिवक्तव्यं।किमविशेषेण।सर्वामंत्रितसि

ल्लुकृस्वर वर्जं सर्वस्वरमामंत्रितस्वरं सिल्लुकृस्वरं च वर्जयित्वा। सर्वस्वरः सर्वस्तोमः सर्वपृष्ठः। सर्व
सुपीत्याद्युदात्तत्वं यथा स्यात्। आमंत्रितस्वरः। सर्पिरागच्छ समागच्छत। आमंत्रितस्य चेत्याद्युदात्तत्वं
यथा स्यात्। सिल्लुकृस्वरः। माहिदातां माहिधातां। आदिः सिचोन्यतरस्यामित्याद्युदात्तस्वरो यथा स्या
त्। किं प्रयोजनं। प्रयोजनं क्तिकि लुकि स्वराः। क्तिकि स्वराः लुकि प्रयोजयति। गर्गाः वत्साः।
विदाः। उर्वाः। उष्ट्रग्रीवाः। वामरज्जुः। ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं मा भूदिति। इदं च अत्रयः। कितइत्यंतो
दात्तत्वं मा भूदिति। पथिमथोः सर्वनामस्थाने लुकि। पथिमथोः सर्वनामस्थाने लुकि प्रयोजनं। लु
मता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्। पथिप्रियः मथिप्रियः। मथिमथोः सर्वनामस्थाने इत्या
स्वरो मा भूदिति। अङ्कारविधौ। अङ्कारविधाने लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्।
आहइदंददाति। अदहर्न्तुडूरोसुपीति प्रत्ययलक्षणेन प्रतिषेधो मा भूदिति। उत्तरपदत्वे चापदादि २४

विधौ। उत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं न भवतीति वक्तव्यम्। परमवाचा प
रमवाचे परमगोदुहे। परमश्वलिहा परमश्वलिहे। पदस्येति प्रत्ययलक्षणेन कुत्वादी निमा
भूवन्निति। अपदादिविधाविति किमर्थं। दधिसेचौ दधिसेचः। सात्पदाद्योरिति षत्वप्रतिषेधो यथा स्यात्। नि३
यद्यपदादिविधाविलुगनेनोत्तरपदाधिकारो न प्रकल्प्येत तत्र को दोषः। कूर्णविल्लिहणादिल्वे
वमादिविधिर्न सिध्यति। यदि पुनर्न लोपादिविधौ लुमता तेन लुमता लुप्ते प्रत्ययलक्षणं न भवति लु
प्यते। नैवं शक्यं। इह हि राजकुमार्यौ राजकुमार्यः इति शीकत्वं प्रसज्येत। नैष दोषः। यदेतद्गिति
त्राकत्वं नेति। एतत्प्रत्ययेशाकत्वं नेति वक्ष्यामि। यदि प्रत्ययेन्याकत्वं ने लुप्यते। दधि अधुना मधु
अधुना। अत्रापि न प्रसज्येत तर्हि। प्रत्यये शाकत्वं न भवति। कस्मिन्यस्माद्यः प्रत्ययो विहित इति।
इह तर्हि परमदिवा परमदिवे दिवउदित्यत्वं प्राप्नोतीति। अस्तु तर्ह्यविशेषेण। ननु चोक्तं। उत्तर

नवकं चं

पदाधिकारो न प्रकल्पेतेति वचनादुत्तरपदाधिकारो भविष्यति। तत्तर्हि वक्तव्यम्। ननु वृत्तिः करिष्य
ते। इदमस्ति। यस्मात्प्रत्ययविधिस्तदादि प्रत्यये ऽङ्गम्। सुप्तिङन्तं पदं। यस्मात्सुप्तिङ्विधिः तदादि सुबं
तं च। नः क्ये। नान्तं क्ये पदसंज्ञं भवतीति यस्मात्क्यविधिः तदादि सुबंतं च। सिति च। सिति च पूर्वं पद
संज्ञं भवति। यस्मात्सित्विधिः तदादि सुबंतं च। स्वादिष्वसर्वनामस्थाने। स्वादिषु असर्वनाम
स्थाने पूर्वं पदसंज्ञं भवति। यस्मात्स्वादिविधिः तदादि सुबंतं च। यचि भं। यजादिप्रत्यये भं
भवतीति। यस्माद्यजादिविधिः तदादि सुबंतं च। इह तर्हि परमवाक् असर्वनामस्थान इति
प्रतिषेधः प्राप्नोति। अस्तु तस्मात्प्रतिषेधः। यस्मात्स्वादौ पदमिति पदसंज्ञा। या सुबंतं पदमिति
पदसंज्ञा सा भविष्यति। सस्ते तत्प्रत्ययग्रामान्न। अनयास्य भविष्यत्यनया न भविष्यतीति। लुप्त
इदानीं प्रत्यये भावन्तु एवावधेः स्वादौ पदमिति पदसंज्ञा तावत् एवावधेः सुबंतं पदमिति अ



स्ति च प्रत्ययलक्षणेन सर्वनामस्थाने परे तत्र कृत्वा प्रतिषेधात् बलीयान्सोन्वर्वीति प्रतिषे
धः प्राप्नोति। नाप्रविषेधात्। नायं प्रसज्यप्रतिषेधः सर्वनामस्थाने नेति किं तर्हि पर्युदासोयं। यद
न्यत्सर्वनामस्थानादिति। सर्वनामस्थाने अप्रमापारः। यदि केनचित्प्राप्नोति तेन भविष्यति। पूर्वे
ण च प्राप्नोति अप्राप्तिर्वा सिध्यवा अनंतरा या प्राप्तिः सा प्राप्तिः प्रतिषिध्यते। कुत एतत्। अनं
तरस्य विधिर्वा भवति प्रतिषेधो वेति पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पू
र्वां प्राप्तिं बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुं। यद्येवं परमवाचौ परमवाच इति सुप्ति
ङन्तं पदमिति पदसंज्ञा प्राप्नोति। एवं तर्हि योगविभागः करिष्यते। स्वादिषु पूर्वं पदसंज्ञं भव
ति। ततः सर्वनामस्थाने अ यचि इ पूर्वं पदसंज्ञं भवति। ततो भं भसंज्ञं भवति। यजादावसर्वना
मस्थान इति। यदि तर्हि सोपि पदं भवति। एचः प्लुतविकारे पदान्तग्रहणं चोदयिष्यते। इह माभूत्

स्थे

नद्यं करोषि गोरिति तस्मिन् क्रियमाणेऽपि प्राप्नोति। वाक्यपदयोरंत्यस्येत्येवं न तत्। इह तर्हि दधिसेचो
दधिसेच सतय दाघोरिति पदादिलक्षणः षत्वप्रतिषेधो न प्राप्नोति। मा भूदेवं। पदस्यादिः पदादिः
पदादेर्नेति। कथं तर्हि पदादिः पदादिः पदादेर्नेति। एवं न विष्यति। नैवं शक्यं। इहापि प्रसज्येत। कुत्सु
कुवाकुः वल्कुः मातृष्वुः किशोरी। षिति। सात्पतिषेधो ज्ञापकः स्वादिष्वपदत्वे नयेषां पदसंज्ञान
तेभ्यः प्रतिषेधो भवतीति। इह तर्हि बकुसेचो बकुसेषः बकुजर्यप्रत्ययः। अत्र पदादा दिः पदादिः
पदादेर्नेति अप्रमाणेऽपि न सिध्यति। एवं तर्हि उत्तरपदत्वे च पदादिविधौ लुमता लुप्ते प्रत्ययल
क्षणं न भवतीति वक्ष्यामि। तन्नियमार्थं भविष्यति पदादिविधावेव न पदांतविधाविति। कथं बकु
सेचो बकुसेचः बकुः स्तुवस्य च पदादिविधावेव न पदांतविधाविति। इदं तस्याः इदं तस्य लुमता
लुप्ते प्रत्ययलक्षणं भवतीति। वक्तव्य मूर्वा कूर्म क्व च। इहाभूवन्निति प्रत्ययलक्षणेन जुस्भावः

२१ वि३

त्रि३

प्राप्नोति। सिचि वृद्धौ प्रसंग आकारप्रकरणात्। सिचि वृद्धौ प्रसंगः। किं कारणं आकारप्रकरणे
त। आत इत्येतन्नियमार्थं भविष्यति। आत एव च सिज्लुगन्तान्नान्यस्मात्। सिज्लुगंतादिति। इह
इति युष्मत्सुत्रादद्दौ इत्यस्य लुग्नो ददाती ह्यत्र प्रत्ययलक्षणेन युष्मदस्मदोः षष्ठीचतुर्थीद्विती
यास्थयोर्वान्नावाविति वान्नावादयः प्राप्नुवंति। युष्मदस्मदोः स्थग्रहणात्। स्थग्रहणं तत्र क्रियते तस्थ
यमाणे विभक्ति विशेषणं विज्ञास्यते। अस्त्यन्यत् स्थग्रहणस्य प्रयोजनं। किं। सविभक्तिकस्य वान्ना
वादयो यथा स्युरिति। नैतदस्ति प्रयोजनं। पदस्येति वर्तते विभक्त्यंतं च पदं तत्रांतरेणापि स्थग्र
हणं सविभक्तिकस्यैव भविष्यति। न वैष सिद्धं यत्र विभक्त्यंतं पदं। यत्र तु खलु विभक्तो पदं तत्र न सि
ध्यंति। ग्रामो वां दीयते ग्रामो नो दीयते। जनपदो वां दीयते जनपदो नो दीयते। सर्वग्रहणमपि प्र
कृतमनुवर्तते तेन सविभक्तिकस्यैव भविष्यति। इह च तुभ्यं मे याजयां चकारेति। सिद्धं तिङ्न्तर

पृं १

तितस्य च निघातः तस्माच्चानिघातः प्राप्नोति। आमिलिलोपात्। तस्य चानिघातः तस्माच्चानिघातः सि
ध्यन्न विष्यति। अंगाधिकारे इटो विधिप्रतिषेधौ। अंगाधिकार इटो विधिप्रतिषेधौ न सिध्यतः। ज
गमिषुः संविवृत्सति अंगस्येति इटो विधिप्रतिषेधौ न प्राप्नुतः। क्रमेश्च दीर्घत्वं च। किं च इटश्च विधिप्र
तिषेधौ नेत्याह। अदेशोऽयं चः पठितः क्रमेश्च दीर्घत्वं उक्राम संक्रामस्ति। इह किं चिदंगाधिकारे
लुमता लुप्ते प्रत्ययलक्षणेन न भवति। किं चिच्चान्यत्र न भवति। यदि पुनर्न लुमता तस्मिन्निति लु
प्यते। अथ न लुमता तस्मिन्निति लुप्यमाने किं सिद्धं भवति। इटो विधिप्रतिषेधौ क्रमेर्दीर्घत्वं
च। बाढं सिद्धं। नेटो विधिप्रतिषेधौ परस्मैपदेष्विति लुप्यते। कथं तर्हि सिकारादाविति। तद्विशेषणं
परस्मैपदग्रहणं। न खल्वपि क्रमेर्दीर्घत्वं परस्मैपदेष्विति लुप्यते। कथं तर्हि शितीति। तद्विशे षकारादाविति
षणं परस्मैपदग्रहणं। न लुमता तस्मिन्निति चेद्धनि णिङादेशास्तल्लोपो न लुमता तस्मिन्निति चेद्धनि

७७

णिङादेशास्तल्लोपे न सिध्यन्ति। अवधिरवतात् दस्युः। अगायि नवतामामः। अध्यगायि नवतानुवाकः। त
लोपश्च लुङीति हनिणिङादेशा न प्राप्नुवन्ति। नैष दोषः। न लुङीति हनिणिङादेशा उच्यन्ते किं तर्हि
आर्धधातुक इति। तद्विशेषणं लुङ्ग्रहणं। इह च सर्वस्तोमः सर्वपृष्ठः सर्वस्मै सुपो लुपा घकारत्वं न
प्राप्नोति। तत्रापि वक्तव्यमानवक्तव्यम्। न लुमतांगस्येत्येव सिद्धं। कथं। न लुमता लुप्ते अंगाधिकारः
प्रतिनिर्दिश्यते। किं तर्हि यो सो लुमता लुप्यते तस्मिन्यदंगं तस्य यत्कार्यं तन्न भवति। एवमपि स
र्वस्वरो न सिध्यति। कर्मणोऽत्र यत्नः। अलोऽन्त्यात्पूर्व उपधा। किमिदमल्ग्रहणमंत्यविशेषणं एवं
न विद्मह इति। उपधासंज्ञायामल्ग्रहणमंत्यनिर्देशश्चेत्संघातप्रतिषेधः। उपधासंज्ञायामल्ग्र
हणमंत्यनिर्देशश्चेत्संघातस्य प्रतिषेधो वक्तव्यः। संघातस्योपधासंज्ञा प्राप्नोति तत्र को दोषः।
शास इदङ्हलोः। शिष्टः शिष्टवान् संघातस्येत्वं प्राप्नोति। यदि पुनरल्ग्रहणंत्यादित्युच्यते एवमप्यंत्य

अविशेषितो भवति। तत्र को दोषः। संघातादपि पूर्वस्योपधासंज्ञा प्रसज्येत तत्र को दोषः। शासइद
ङ्हलोः। शिष्टः शिष्टवान् इकारस्यैव प्रसज्येत। सत्त्वं च निघ्यते यथान्यासमेवास्तु। ननु चोक्तमु
पधासंज्ञायामल्ग्रहणमंत्यनिर्देशार्थं संघातप्रतिषेधार्थं इति नैष दोषः। अंत्यविज्ञानात्सिद्धं
सिद्धमेतत् कथं। अलोंत्यस्य यो विधिर्भवतीत्यंत्यस्य भविष्यति। नानर्थके लोंत्यविधिरनभ्या
सविकारे। अनर्थके अलोंत्यविधिर्नेत्येषा परिभाषा कर्तव्या। किमविशेषेण नेत्याह। अनभ्यास
अनभ्यासविकारे। अभ्यासविकारान्वर्जयित्वा। अत्रापि लक्षान्तेपि पक्ष्यति। कान्येतस्याः प
रिभाषायाः प्रयोजनानि। प्रयोजनमभ्यासानुकरणस्यातदृतो। अंत्यस्य प्राप्नोति अनर्थके
लोंत्यविधिर्न भवतीति न दोषो भवति। नैतदस्ति प्रयोजनं। आचार्यप्रवृत्तिर्ज्ञापयति नांत्य
स्य पररूपं भवतीति यदयं नाभ्यस्ते तिस्पौ अस्यस्थ तत्वे त्वाह। ध्वसोरेद्धावभ्यासलोपश्च। ध्वसोरे

द्धावभ्यासलोपश्चेत्यंत्यस्य प्राप्नोति। अनर्थके अलोंत्यविधिर्नेति न दोषो भवति। एतदपि नास्ति प्रयो
जनं। पुनर्लोपवचनसामर्थ्यात्सर्वस्य भविष्यति। अथवा शित्त्वोपः करिष्यते स शित्सर्वस्येति स
र्वादेशो भविष्यति। स तर्हि शकारः कर्तव्यः न कर्तव्यः। क्रियते न्यास एव द्विशकारको निर्देशः। ध्वसोरे
द्धावभ्यासलोपश्चेति। अपिलोपो कोनच्चितिष्ठति सूत्रं अन्यथाभारव्यायते। आपिहल्लिलोपइत्यं
त्यस्य प्राप्नोति। अनर्थके अलोंत्यविधिर्नेति न दोषो भवति। एतदपि नास्ति प्रयोजनं। अत एव लो
पं वक्ष्यामि तदनोग्रहणं कर्तव्यं यत्नः न कर्तव्यम्। प्रकृतमनुवर्तते। क्व प्रकृतं। अनाप्यकः इति तदैव प्र
थमानिर्दिष्टं षष्ठीनिर्दिष्टे न चेहार्थः। हलीत्येषा सप्तमी अनितिप्रथमायाः षष्ठी प्रकल्पयिष्यति।
तस्मिन्निति निर्दिष्टे पूर्वस्येति। अत्र लोपोऽभ्यासस्य अंत्यस्य प्राप्नोति। नानर्थके अलोंत्यविधिरि
ति न दोषो भवति। एतदपि नास्ति प्रयोजनं। अग्रहणसामर्थ्यात्सर्वस्य भविष्यति। अस्त्यन्यद्

ग्रहणस्य प्रयोजनं। किं सन्नाधिकारो पेक्ष्यते इह माभूत्। दध्योददो। अंतरेण ग्रहणं सन्निधि
कारमपेक्षिष्यामहे। संस्तर्हि सिकारादिरपेक्ष्यते सन्निसिकारादाविति। इह माभूत्। जिघ्न यथिज
तीति अंतरेणाप्यग्रहणं सनं सकारादिमपेक्षिष्यामहे। प्रकृतयस्तर्ह्यपेक्ष्यंते एतासां प्रकृतीनां
लोपो यथा स्यात्। इह माभूत्। पिपिक्षति पियक्षति। अंतरेणाप्यग्रहणमेताः प्रकृतीरपेक्षि
ष्यामहे। विषयस्तर्हि अपेक्ष्यते। मुचोकर्मकस्य गुणो वेति। इह माभूत्। मुमुक्षति गामिति। अंतरे
णाप्यग्रहणमेतं विषयमपेक्षिष्यामहे। तस्मान्नार्थेनियापरिगाणयानानर्थकेऽलोत्यविधि
वा रिति। अलोंत्यात्पूर्वेलिपधेतिवा। अथवा व्यक्तमेव पठितं अलः अंत्यात्पूर्वोलिपधासंज्ञो
भवतीति तर्हि वक्तव्यं न वक्तव्यं। अवचनाल्लोकविज्ञानात्सिद्धं। अंतरेणापि वचनं लोके विज्ञा
नात्सिद्धमेतत्। तद्यथा लोके अमीषां ब्राह्मणानामंत्यात्पूर्वं आनीयतामित्युक्ते यथाजातीयकां

कृ यं। उपकर्मकस्यैस्युच्यते। यत्रैवायंमुचिरकर्मकस्तत्रैव भविष्यतिवचनात् ४

७६

त्यस्तथाजातीयाकांत्यात्पूर्व आनीयते॥ ॥तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादित्युत्तरस्य॥ ।किमुदा
हरणं। इहत्तावत्तस्मिन्निति निर्दिष्टे पूर्वस्येति इकोयणचि दध्यत्र मध्वत्र। इह तस्मादित्युत्तरस्येति
द्यंतरुपसर्गेभ्योप ईत् द्वीपं अंतरीपं समीपं। अन्यथाजातीयकेन शब्देन निर्देशः क्रियते अन्यथाजा
तीयकं उदाह्रियते किं तर्ह्युदाहरणं। इहत्तावत्तस्मिन्निति निर्दिष्टे पूर्वस्येति तस्मिन्नणि च युष्माका
स्माकाविति। तस्मादित्युत्तरस्येति तस्माच्छसो नः पुंसीति। इदं चाप्युदाहरणं इकोयणचि द्यंतरुप
सर्गेभ्योप ईदिति। कथं। सर्वनाम्नायं निर्देशः क्रियते सर्वनाम च सामान्यवाचि तत्र सामान्ये
निर्दिष्टे विशेषा अप्युदाहरणानि भवंति। किं पुनः सामान्यं को विशेषः। गोः सामान्यं कृष्णं विशेषः। न
तर्हीदानीं कृष्णः सामान्यं गोर्विशेषो भवति। भवति च। यदि तर्हि सामान्यमपि विशेषः विशेषोपि सामा
न्यं सामान्यविशेषौ न प्रकल्पेते। प्रकल्पेते च। कथं विवक्षातः। यदास्य गोः सामान्येन विवक्षितो भवति हि

ष्मा विवक्षितो विशेषस्तेन न तदा गौः सामान्यं भवति विशेषः। यदास्य भवति सामान्येन विवक्षितो न तदा गौर्वि
शेषत्वेन विवक्षितस्तदा भवति सामान्यं गौर्विशेषः। अपर आह। प्रकल्प्यते च। कथं। पितापुत्रवत्।
तद्यथा। स एव कंचित्प्रति पिता भवति कंचित्प्रति पुत्रो भवति। एवमिहापि स एव कंचित्प्रति सामा
न्यं कंचित्प्रति विशेषः। एते खल्वैनैर्दिशिकानां वार्त्ततरका भवंति। ये सर्वनाम्ना निर्दिश्यंते। क्रि
यंते एते र्हि बहुतरकं व्याप्यते। अथ किमर्थमुपसर्गेण निर्देशः क्रियते। शाब्दे सप्तम्या निर्दि
ष्टे पूर्वस्य कार्यं यथा स्यात्। अर्थे मा भूत्। उन्नपदे अतिशायन इति। किं गतमेतदुपसर्गेण आ
हो स्विच्छब्दाधिक्यादर्थाधिक्यं। गतमित्याह। कथं। निरयं बहिर्भावे वर्त्तते। तद्यथा। निष्क्रांतो देशा
न्निर्देशः बहिर्देशादिति गम्यते। शब्दश्चेदर्थाद्बहिर्भूतः। अर्थो बहिर्भूतः। अथ निर्दिष्टग्र
हणं किमर्थं। निर्दिष्टग्रहणमानंतर्यार्थं। निर्दिष्टग्रहणं क्रियते आनंतर्यार्थं। आनंतर्यमात्रे

कार्यं यथा स्यात्। इको यणचि। दध्यत्र मध्वत्र। मा भूत्। समिधौ समिधः दृषदौ दृषदः। किमर्थं
पुनरिदमुच्यते। तस्मिन्नित्युक्ते तस्मादिति। पूर्वेन्निरयोर्योगायोगयोरविशेषान्नियमार्थोयमारंभः। आ
मे देवदत्तः। पूर्वः पर इति संदेहः। ग्रामाद्देवदत्तः पूर्वः पर इति संदेहः। एवमिहापि इको यणचि दध्युद
कं पचत्योदनं उन्ना विक्केठ नावचो अचि पूर्वस्य अचि परस्येति संदेहः। तिङ्। तिङ इति अतिङः पूर्व
स्य अतिङः परस्येति संदेहः। इष्यते चाचि पूर्वस्य स्यात् अतिङः परस्येति। तच्चांतरेण यत्नं न
सिध्यतीति नियमार्थं। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। अथ यत्रोभयं नि
र्दिश्यते किं तत्र पूर्वस्य कार्यं भवति। आहोस्वित्परस्येति। उभयनिर्देशे विप्रतिषेधात्पंचमीनिर्दे
शः। उभयनिर्देशे विप्रतिषेधात्पंचमीनिर्देशो भविष्यति। किं प्रयोजनं। प्रयोजनं तोलसार्व
धातुकानुदात्ते चा। बस्यनिनास्यादित्यानुदात्तत्वे च सप्तमीनिर्देशोऽभ्यस्तसिजर्थ इति। तास्मिन्क्रिय

म्राणे। तास्यादिभ्यः परस्य लसार्वधातुकस्य लसार्वधातुके परतः तास्यादीनामिति संदेहः॥ तास्यादिभ्यः पर
स्य लसार्वधातुकस्य। बहोरिष्ठादीनामादिलोपः। बहोरुत्तरेषामिष्ठमेयसां। इष्ठमेयस्सु परतो ब
होरिति संदेहः॥ बहोरुत्तरेषामिष्ठमेयसां। गोतो णित्। गोतः परस्य सर्वनामस्थानस्य। सर्वनामस्था
ने परतो गोत इति संदेहः। गोतः परस्य सर्वनामस्थानस्य। सर्वनामस्थाने। रुदादिभ्यः सार्वधातुके। रु
दादिभ्यः परस्य सार्वधातुकस्य सार्वधातुके परतो रुदादीनामिति संदेहः॥ रुदादिभ्यः परस्य सार्वधा
तुकस्य। आनेमुगादासः। आस उत्तरस्यानस्याने परत आस इति संदेहः॥ आस उत्तरस्यानस्य।
आमि सर्वनाम्नः सुट्। सर्वनाम्न उत्तरस्यामः आमि परतः सर्वनाम्न इति संदेहः॥ सर्वनाम्न उ
त्तरस्यामः। घेर्ङिति। आण्नद्याः॥ नद्याः परेषां ङितां ङित्सु परतो नद्या इति संदेहः॥ नद्या उत्तरेषां ङितां। या
डापः॥ आप उत्तरस्य ङितः ङिति परतः आप इति संदेहः॥ आप उत्तरस्य ङितः। ङमो ह्रस्वादचि ङमुण्नित्यं।

ङम उत्तरस्याचः। अचि परतो ङम इति संदेहः॥ ङम उत्तरस्याचः॥ विभक्तिविशेषनिर्देशानवकाशत्वा
द्विप्रतिषेधः॥ विभक्तिविशेषनिर्देशस्यानवकाशत्वादयुक्तं विप्रतिषेधः॥ सर्वत्रैवात्र कृतसा
सामर्थ्यासिद्धमा। अकृतसामर्थ्या पंचमीति कृत्वा पंचमीनिर्देशो न विध्यते। यथार्थं वा षष्ठीनिर्दे
शः॥ यथार्थं वा षष्ठीनिर्देशः कर्तव्यः। यत्र पूर्वस्य कार्यमिष्यते। तत्र पूर्वस्य षष्ठी कर्तव्या। यत्र प
रस्य कार्यमिष्यते तत्र परस्य षष्ठी कर्तव्या॥ स तर्हि तथा निर्देशः कर्तव्यः। न कर्तव्यः॥ अनेनैव प्र
कृतिर्विध्यति। तस्मिन्निति निर्दिष्टे पूर्वस्य षष्ठी स्थानेयोगेति। प्रकल्पकमिति चेन्नियमाभावः। प्र
कल्पकमिति चेन्नियमस्याभावः॥ उक्तं चैतन्नियमार्थोयमारंभ इति प्रत्ययविधौ खल्वपि पंचम्यः
प्रकल्पिकास्तु॥ तत्र को दोषः॥ गुप्तिज्किद्भ्यः सन्। गुप्तिज्किद्भ्य इत्येषा पंचमी सन्निति प्रथमायाः
षष्ठीं प्रकल्पयेत्। तस्मादित्युत्तरस्येति न्नस्तु न कश्चिदन्यः आदेशः प्रति निर्दिश्यते तत्रांतर्यतः स

नः सनेवत्तविष्यति। नैवं शक्यं। इह संज्ञा न प्रकल्प्येत उपदेश इति संज्ञोच्यते। प्रकृतिविकाराव्यवस्था
चा प्रकृतिविकारयोश्च व्यवस्था न प्रकल्प्येत। इको यणचि। अचीत्येषा सप्तमी यणिति प्रथमायाः
षष्ठीं प्रकल्पयेत्। तस्मिन्निति निर्दिष्टे पूर्वस्येति। सप्तमीपंचम्योश्चाभावादुभयत्र षष्ठी प्रसक्तिः त
त्रोभयकार्यप्रसंगः। सप्तमीपंचम्योश्चाभावादुभयत्रैव षष्ठी प्राप्नोति। तस्मादित्युत्तरस्येषा पंचम
त्सार्वधातुक इत्यस्याः सप्तम्याः षष्ठीं प्रकल्पयेत्। तस्मिन्निति निर्दिष्टे पूर्वस्येति। तत्र को दोषः।
तत्रोभयकार्यप्रसंगः। उभयोः कार्यं तत्र प्राप्नोति। नैष दोषः। यत्रावधुच्यते। प्रकल्पकमिति चे
न्नियमार्थावधृती। माभूदयं नियमः। सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्येत पंचमीनिर्दिष्टे पर
स्य। यावता सप्तमीनिर्दिष्टे पूर्वस्य षष्ठी प्रकल्प्यते। पंचमीनिर्दिष्टे परस्य। नोभयत्र सप्तमीनि
र्दिष्टे परस्य कार्यं निवर्तितं नापि पंचमीनिर्दिष्टे पूर्वस्य। यदप्युच्यते प्रत्ययविधौ खल्वपि पंचम्याः प्रक

ल्पिकाः स्युरिति। संतु प्रकल्पिकाः। ननु चोक्तं गुप्तिज्किद्भ्यः सन्निति एषा पंचमी सन्निति प्रथमायाः षष्ठीं
प्रकल्पयेत्। तस्मादित्युत्तरस्येति। परिहृतमेतत्। न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते तत्रानयतिः स
नः सनेवत्तविष्यति। ननु चोक्तं नैवं शक्यं। इह संज्ञा न प्रकल्प्येत उपदेश इति संज्ञोच्यते। स्यादेष दो
षः। यदि संज्ञा आदेशं प्रतीक्षेत। तत्र तु खलु कृतायामिसंज्ञायां लोपे च कृते आदेशो भविष्यति
उपदेशे इति हि संज्ञोच्यते। अथवा नानुबन्धे सति प्रकृत्यान्वितव्यं। यदा चोत्पन्नः सन्न तदा कृत
सामर्थ्यात् पंचमीति कृत्वा प्रकृतिर्न भविष्यति। यदप्युच्यते। प्रकृतिविकाराव्यवस्था चेति। तत्रापि
कृतान्प्रकृतौ षष्ठी इक इति। विकृतौ प्रथमा यणिति। यत्र च नाम सौत्री षष्ठी नास्ति तत्र प्रातकृत्यान
वितव्यम्। अथवा अस्तु तावदिको यणिति यत्र नाम सौत्री षष्ठी। यदि चेदानीमचीत्येषा सप्तमी यणि
ति प्रथमायाः षष्ठीं प्रकल्पयेत्। तस्मिन्निति निर्दिष्टे पूर्वस्येति। अस्तु न कश्चिदन्य आदेशः प्रतिनिर्दिश्यते।

तत्रांतर्यतो यणायणो न विप्यति। यदप्युच्यते। सप्तमीपंचम्योश्च भावादुभयत्र षष्ठी प्रकॢप्तिस्तत्रोभ
कार्यप्रसंग इति। आचार्यप्रवृत्तिर्ज्ञापयति। नोभे युगपत्प्रकल्पिके भवत इति। यदयमेकः पूर्वपरयो
रिति पूर्वपरग्रहणं करोति। तस्मिन्निति निर्दिष्टे पूर्वस्य तस्मादित्युत्तरस्य। ।स्वं रूपं शब्दस्याशब्दसं
ज्ञा। ।रूपग्रहणं किमर्थं। न स्वं शब्दस्य संज्ञा भवतीत्येव रूपं शब्दस्य संज्ञा भविष्यति। न ह्यन्यत्स्वं श
ब्दस्यास्ति अन्यदतो रूपात्। एवं तर्हि सिद्धे सति यद्रूपग्रहणं करोति तज्ज्ञापयत्याचार्यः। अस्त्यन्य
द्रूपात्स्वं शब्दस्येति। किं पुनस्तत्। अर्थः। किमेतस्य ज्ञापने प्रयोजनं। अर्थवद्ग्रहणे नानर्थकस्येत्येषा
परिभाषा न कर्तव्या भवति। किमर्थं पुनरिदमुच्यते। शब्देनार्थगतेरर्थस्यासंभवात्तद्वाचिनः संज्ञाप्र
तिषेधार्थं स्वंरूपं। न। वचनं। शब्देनोच्चारितेनार्थो गम्यते। गामानय दध्यशानेति अर्थ आनीय
ते अर्थश्च भुज्यते। अर्थस्यासंभवात्। इह व्याकरणे अर्थे कार्यस्यासंभवः। अग्नेर्ढगिति न शक्यतेंगारे

५३

भ्यः परो ढक् कर्तुं। शब्देनार्थगतेरर्थस्यासंभवात् यावंतस्तद्वाचिनः शब्दास्तावद्भ्यः सर्वेभ्य उत्पत्तिः प्राप्नोति।
इष्यते च तस्मादेव स्यादिति। तत्रांतरेण यत्नं न सिध्यतीति तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वंरूपवचनं। ए
वमर्थमिदमुच्यते। न चाशब्दपूर्वको ह्यर्थे संप्रत्ययः तस्मादर्थनिवृत्तिः। न वा एतत्प्रयोजनमस्ति। किं
कारणं। शब्दपूर्वको ह्यर्थे संप्रत्ययः। शब्दपूर्वको ह्यर्थस्य संप्रत्ययः। आतश्च शब्दपूर्वकः। योप्यसा
वारूयते नाम्ना नाम यदानेन नोपलब्धं भवति तदा पृच्छति किं भवानाहेति। शब्दपूर्वकश्चार्थस्य संप्रत्य
यः। इह च व्याकरणे शब्दकार्यस्य संभवः। असंभवोर्थे। तस्मादर्थनिवृत्तिर्भविष्यति। इदं तर्हि प्रयो
जनं। अशब्दसंज्ञेति वक्ष्यामीति। इह मा भूत्। दाधा घ्वदाप्। तरप्तमपौ घ इति। संज्ञाप्रतिषेधान
र्थक्यं वचनप्रामाण्यात्। संज्ञाप्रतिषेधोऽनर्थकः। शब्दसंज्ञायां स्वरूपविधिः कस्मान्न भवति। व
चनप्रामाण्यात्। शब्दसंज्ञावचनसामर्थ्यात्। ननु वचनप्रामाण्यात्संज्ञिनां संप्रत्ययः स्यात्। स्व

रूपग्रहणाच्च संज्ञायाः। एतदपि नास्ति प्रयोजनं। आचार्यप्रवृत्तिर्ज्ञापयति शास्त्रसंज्ञायां न स्वरूपविधिर्भ
वतीति यदयं ष्णान्ता षट् इति षकारान्तायाः संख्यायाः षट्संज्ञां शास्ति इतरथा हि वचनप्रामाण्यान्न का
रांतायाः संख्यायाः स्यात्। स्वरूपग्रहणाच्च षकारांतायाः नैतदस्ति ज्ञापकं नहि षकारांता संज्ञा॥ का
तर्हि डकारांता। आदिष्टुजस्त्वं तस्यासिद्धत्वात्षकारांता॥ मंत्राद्यर्थं तर्हि इदं वक्तव्यम्। मंत्रे ऋचि य
जुषीति यदुच्यते तन्मंत्रशब्दस्य ऋक्शब्दस्य च मा भूत्। मंत्राद्यर्थमिति चेच्छास्त्रसामर्थ्यादर्थगतेः सि
द्धं। मंत्राद्यर्थमिति चेत्तन्न। किं कारणं। शास्त्रस्य सामर्थ्यादर्थस्य गतिर्भविष्यति। मंत्रे ऋचि यजुषीति
यदुच्यते मंत्रशब्दे ऋक्शब्दे यजुःशब्दे च तस्य कार्यस्य संभवो नास्तीति ऋचां मंत्रादिसहचरितो यो
ऽर्थः तस्य गतिर्भविष्यति। साहचर्यात्। सित्तद्विशेषाणां वृक्षाद्यर्थं। सिन्निर्देशः कर्तव्यः। ततो वक्तव्यं
तद्विशेषाणां ग्रहणं भवतीति किं प्रयोजनं। वृक्षाद्यर्थं। विभाषा वृक्षमृगेति प्लक्षन्यग्रोधं प्लक्षन्यग्रो

धाः। पित्पर्यायवचनस्य च स्वाद्यर्थं। पिन्निर्देशः कर्तव्यः। ततो वक्तव्यं पर्यायवचनस्य च विशेष
णो च ग्रहणं भवति स्वस्य रूपस्येति। किं प्रयोजनं। स्वाद्यर्थं स्वे पुषः स्वपोषं पुष्यति। विद्यापोषं रैपो
षं। गोपोषं। अश्वपोषं। जित्पर्यायवचनस्यैव राजाद्यर्थं। जिन्निर्देशः कर्तव्यः। ततो वक्तव्यं पर्या
यवचनस्यैव ग्रहणं भवति। किं प्रयोजनं। स्वाद्यर्थं राजाद्यर्थं सभा राजामनुष्यपूर्वा इनसभं ई
श्वरसभं तस्यैव न भवति। राजसभा। तद्विशेषाणां च न भवति। पुष्यमित्रसभा। झित्तस्य च तद्विशे
षाणां च मत्स्याद्यर्थं। झिन्निर्देशः कर्तव्यः। ततो वक्तव्यं तस्य च ग्रहणं भवति तद्विशेषाणां चेति। किं
प्रयोजनं। मत्स्याद्यर्थं। पक्षिमत्स्यमृगान् हंति मात्स्यिकः। तद्विशेषाणां शाफरिकः शाकुलि
कः। पर्यायवचनानां न भवति। अजिह्मान् हंतीति अनिमिषान् हंतीति अस्यैकस्य पर्यायवचनस्ये
ष्यते। मैनानां हंति मैनिकः॥ स्वं रूपं शब्दस्याशब्दसंज्ञा॥ ॥अणुदित्सवर्णस्य चाप्रत्ययः॥ ।अणु

त्यय इति किमर्थं। सनाशंसभिक्ष उः। असांप्रतिकेऽल्पमिदमुच्यते। अप्रत्यय इति। अप्रत्ययादेशटित्किमि
न्मित इति वक्तव्यं। अप्रत्यय एव तावदुक्तं। आदेशे। इदम इश्। इतः। ऊठ्। टिति। लविता। लविष्ठा। किति। बभूव। मि
ति। हे अनड्वन्। टितः परिहारः। आद्यन्तौ टकितावपि यति। न टितां सवर्णानां ग्रहणं भवति। यदयं ग्रहो
लिटि दीर्घत्वं शास्ति। नैतदस्ति। ज्ञापकं। नियमार्थमेतत्स्यात्। ग्रहः अलिटि दीर्घ एवेति। सत्तर्हि वृतो वेति वि
भाषां शास्ति। सर्वेषामेष परिहारः। भाव्यमानेन सवर्णानां ग्रहणं न इत्येवं न विष्यति। प्रत्ययेऽप्ययमपरिहा
रः। अननित्वधानात्प्रत्ययः। सवर्णान्न ग्रहीष्यति। यानप्रत्ययः सवर्णग्रहणे न गृह्णीयात्। न तेरर्थस्याभि
धानं स्यात्। अननिधानान्न न विष्यति। इदं तर्हि प्रयोजनं। इह केचिल्लतीयं ते केचित्त्वलाप्यं ते ह्रस्वाः प्र ८६
तीयंते दीर्घाः प्लुताश्च्यंते। यावता ऽप्रयाति ऽप्रत्याप्यमानेन सवर्णानां ग्रहणं नेति तावदप्रत्यय इति। किंपुन
दीर्घः सवर्णग्रहणेन गृह्णीयात्। ह्रस्वं। यत्नाधिक्यान्न ग्रहीष्यसि। प्लुतं तर्हि गृह्णीयात्। अनणत्वान्न